प्रथमः पाठः १

# वन्दना



**या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता,**
**या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।**
**या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता,**
**सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ।।१ ।।**

**भावार्थः** – या सरस्वती कुन्दपुष्पमिव चन्द्रमिव हिममिव च धवलं हारं धारयति। या श्वेतवस्त्रैः आवृता वर्तते। यस्याः हस्ते वीणा शोभायमाना अस्ति। या सरस्वती श्वेतकमले आरूढा वर्तते। यस्याः अर्चनं ब्रह्मविष्णुमहेशादयाः देवाः अपि कुर्वन्ति। सम्पूर्णां जडताम् अज्ञानतां वा विनाशयितुं समर्था सा सरस्वती मां रक्षतु।

**शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद् व्यापिनीम्,**
**वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम्।**
**हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थिताम्,**
**वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ।।२ ।।**

**भावार्थः** – ब्रह्मविद्यायाः सारस्वरूपा आद्यशक्तिः सम्पूर्णे विश्वे विद्यमाना, शुभ्रवर्णीया, सम्पूर्णाम् अज्ञानतां विनाशिनी, हस्तयोः वीणां, पुस्तकं, स्फाटिकमौक्तिकानां मालां धारयति। या कमलासने स्थिता तां बुद्धिदायिनीं भगवतीं सरस्वतीम् अहं वन्दे।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| कुन्दम् | श्वेतवर्णीयं पुष्पविशेषम् | कुन्द पुष्प |
| इन्दुः | शशिः | चन्द्रमा |
| तुषारः | हिमं | बर्फ |
| धवला | श्वेता | सफेद |
| शुभ्रम् | स्वच्छम् | स्वच्छ |
| वस्त्रावृता | वस्त्रेण आच्छादिता | वस्त्र से ढकी हुई। |
| पद्मासना | कमले आसीना | कमल पर बैठी हुई |
| अच्युतः | विष्णुः | भगवान् विष्णु |
| प्रभृतिभिः | इत्यादिभिः | इत्यादि से |
| पातु | रक्षतु | रक्षा करे |
| निःशेषः | सम्पूर्णः | सम्पूर्ण |
| जाड्यापहा | अज्ञानस्य अपहर्त्री | अज्ञान को हरने वाली |
| जगद्व्यापिनीम् | संसारे विद्यमानाम् | सम्पूर्ण विश्व में व्याप्त रहने वाली को |
| अभयदाम् | निर्भयकारिणीम् | अभय देने वाली को |
| जाड्यम् | अज्ञानताम् | अज्ञानता को |
| अपहाम् | हारिणीम् | हरने वाली को |
| स्फाटिकमालिकाम् | स्फाटिकमौक्तिकमालाम् | स्फटिक नामक मोतियों की माला को |
| विदधती | धारयन्ती | धारण करती हुई |
| संस्थिताम् | सम्यक् रूपेण स्थिताम् | विराजमान |
| बुद्धिप्रदाम् | बुद्धिप्रदायिनीम् | बुद्धि प्रदान करने वाली को |

## अभ्यासः

### मौखिकप्रश्नाः

१. **अधोलिखितानां शब्दानाम् उच्चारणं कुरुत –**

| | | | |
|---|---|---|---|
| कुन्देन्दुः | शुभ्रवस्त्रावृता | पद्मासना | ब्रह्मा |
| शङ्करप्रभृतिभिः | निःशेषजाड्यापहा | आद्याम् | अन्धकारापहाम् |
| स्फाटिकमालिकाम् | संस्थिताम् | | |

**२. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन वदत –**

(क) कुन्देन्दुतुषारहारधवला का ?

(ख) सरस्वती कुत्र आसीना ?

(ग) सरस्वती हस्ते किं विदधति ?

(घ) कीदृशीं शारदां वन्दे ?

## लिखितप्रश्नाः

**१. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत –**

(क) सरस्वती केन वस्त्रेण आवृता ?

(ख) सरस्वती कैः देवैः वन्दिता ?

(ग) शारदा कस्य अपहा ?

(घ) सरस्वत्याः हस्तयोः किं धारितम् ?

(ङ) का जगद्व्यापिनी ?

**२. रिक्तस्थानं पूरयत –**

(क) या ..................... वरदण्डमण्डितकरा ।

(ख) देवैः ....................... वन्दिता ।

(ग) वन्दे तां ...................... भगवतीम् ।

(घ) .................. धारिणीमभयदाम् ।

(ङ) बुद्धिप्रदां ................................ ।

**३. मञ्जूषातः पर्यायपदं चित्वा लिखत –**

| रक्षतु, सम्पूर्णः, इत्यादिभिः, शशिः, तमः |
|---|

(क) इन्दुः – ....................................................

(ख) प्रभृतिभिः – ....................................................

(ग) अन्धकारः – ..................................................

(घ) पातु – ....................................................

(ङ) निःशेषः – ....................................................

**४. सन्धिविच्छेदं कुरुत -**

(क) ब्रह्माच्युतः – ................................ + ................................

(ख) कुन्देन्दुः – ................................ + ................................

(ग) पद्मासना – ................................ + ................................

(घ) परमामाद्या – ................................ + ................................

(ङ) जाड्यान्धकारापहाम् – ................................ + ................................

## योग्यता-विस्तारः

**ॐ सह नाववतु सह नौ भुनक्तु, सह वीर्यं करवावहै ।**
**तेजस्विनावधीतमस्तु मा विद्विषावहै ।।**
**ॐ शान्तिः शान्तिः शान्तिः ।।**

**भावार्थ : –** स ईश्वरः आवां गुरुशिष्यौ एकशः रक्षतु, एकशः पातु, आवाम् एकशः पराक्रमं कुर्वः, आवयोः पठितं ज्ञानं तेजस्वी भवतु, आवां परस्परं द्वेषं न कुर्वः, सर्वत्र शान्तिः भवतु, शान्तिः भवतु, शान्तिः भवतु।

**( क ) भाव-विस्तार : -**

⇨ भारतीयज्ञानपरम्परायां सरस्वती विद्यायाः देवतारूपे प्रतिष्ठिता वर्तते। अस्माकं साहित्यपरम्परायां ग्रन्थस्य निर्विघ्नं समाप्त्यर्थं ईश्वरं प्रति प्रार्थना मङ्गलाचरणमुच्यते।

**अधोलिखिता सरस्वतीवन्दना अपि स्मरणीया**

जय जय हे भगवति सुरभारति! तव चरणौ प्रणमामः।
नादब्रह्ममयि जय वागीश्वरि! शरणं ते गच्छामः ।। जय ....... ।।
त्वमसि शरण्या त्रिभुवनधन्या, सुरमुनि-वन्दित चरणा।
नवरसमधुरा कवितामुखरा, स्मित-रुचि-रुचिराभरणा ।। जय ....... ।।
आसीना भव मानसहंसे, कुन्द-तुहिन-शशि-धवले।
हर जडतां कुरु बोधिविकासं, सित-पङ्कज-तनु-विमले ।। जय ....... ।।
ललितकलामयि ज्ञानविभामयि, वीणा-पुस्तक-धारिणी।
मतिरास्तां नो तव पदकमले, अयि कुण्ठाविष-हारिणी ।। जय ....... ।।

**( ख ) भाषाविस्तारः -**

**पा धातुः लोट्लकारः ( आज्ञार्थक-कालः )**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पातु | पाताम् | पान्तु |
| मध्यमपुरुषः | पाहि | पातम् | पात |
| उत्तमपुरुषः | पानि | पाव | पाम |